# Jambudvipavarnanam in Brahmapurana

# બ્રહ્મપુરાણાન્તર્ગતે જમ્બૂદ્વીપવર્ણનં

## Document Information

Text title : Jambudvipa Varnanam in Brahmapurana

File name : jambUdvIpavarNanambrahmapurANa.itx

Category : misc

Location : doc_z_misc_general

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : brahmapurANam . bhuvanakoshe

Latest update : November 19, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 21, 2023

*sanskritdocuments.org*

# બ્રહ્મપુરાણાન્તર્ગતે જમ્બૂદ્વીપવર્ણનં

લોમહર્ષણ ઉવાચ -
ઉત્તરેણ સમુદ્રસ્ય હિમાદ્રેશ્ચૈવ દક્ષિણે ।
વર્ષં તદ્ભારતં નામ ભારતી યત્ર સન્તતિઃ ॥ ૧॥

નવયોજનસાહસ્રો વિસ્તારશ્ચ મુનીશ્વરાઃ ।
કર્મભૂમિરિયં સ્વર્ગમપવર્ગં ચ ઇચ્છતામ્ ॥ ૨॥

મહેન્દ્રો મલયઃ સંહ્યઃ શુક્તિમાનૃક્ષપર્વતઃ ।
વિન્ધ્યશ્ચ પારિયાત્રશ્ચ સપ્તાત્ર કુલ પર્વતાઃ ॥ ૩॥

અતઃ સમ્પ્રાપ્યતે સ્વર્ગો મુક્તિમસ્માત્પ્રયાતિ વૈ ।
તિર્યક્ત્વં નરકં ચાપિ યાન્ત્યતઃ પુરુષા દ્વિજાઃ ॥ ૪॥

ઇતઃ સ્વર્ગશ્ચ મોક્ષશ્ચ મધ્યં ચાન્તે ચ ગચ્છતિ ।
ન ખલ્વન્યત્ર મર્ત્યાનાં કર્મ ભૂમૌ વિધીયતે ॥ ૫॥

ભારતસ્યાસ્ય વર્ષસ્ય નવ ભેદાન્નિશામય ।
ઇન્દ્રદ્વીપઃ કસેરુમાંસ્તામ્રપર્ણો ગર્ભસ્તિમાન્ ॥ ૬॥

નાગદ્વીપસ્તથા સૌમ્યો ગન્ધર્વસ્ત્વથ વારુણઃ ।
અયં તુ નવમસ્તેષાં દ્વીપઃ સાગરસંવૃતઃ ॥ ૭॥

યોજનાનાં સહસ્રં ચ દ્વીપોઽયં દક્ષિણોત્તરાત્ ।
પૂર્વે કિરાતાસ્તિષ્ઠન્તિ પશ્ચિમે યવનાઃ સ્થિતાઃ ॥ ૮॥

બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યા મધ્યે શૂદ્રાશ્ચ ભાગશઃ ।
ઇજ્યાયુદ્ધવાણિજ્યાદ્યૈ વૃત્તિમન્તો વ્યવસ્થિતાઃ ॥ ૯॥

શતદ્રુચન્દ્રભાગાદ્યા હિમવત્પાદનિઃસૃતાઃ ॥

વેદસ્મૃતિમુખાશ્ચાન્યાઃ પારિયાત્રોદ્ભવા મુને ॥ ૧૦॥

નર્મદાસુરસાદ્યાશ્ચ નદ્યો વિન્ધ્યવિનિઃસૃતાઃ ।

તાપીપયોષ્ણીનિર્વિન્ધ્યાકાવેરીપ્રમુખા નદીઃ ॥ ૧૧॥

ઋક્ષપાદોદ્ભવા હ્યેતાઃ શ્રુતાઃ પાપં હરન્તિ યાઃ ।
ગોદાવરીભીમરથીકૃષ્ણવેણ્યાદિકાસ્તથા ॥ ૧૨॥

સહ્યપાદોદ્ભવા નદ્યઃ સ્મૃતાઃ પાપભયાપહાઃ ।
કૃતમાલાતામ્રપર્ણીપ્રમુખા મલયોદ્ભવાઃ ॥ ૧૩॥

ત્રિસાન્ધ્યઋષિકુલ્યાદ્યા મહેન્દ્રપ્રભવાઃ સ્મૃતાઃ ।
ઋષિકુલ્યાકુમારાદ્યાઃ શુક્તિમત્પાદસમ્ભવાઃ ॥ ૧૪॥

આસાં નદ્યુપનદ્યશ્ચ સન્ત્યન્યાસ્તુ સહસ્રશઃ ।
તાસ્વિમે કુરુપઞ્ચાલમધ્યદેશાદયો જનાઃ ॥ ૧૫॥

પૂર્વદેશાદિકાશ્ચૈવ કામરૂપનિવાસિનઃ ।
પૌણ્ડ્રાઃ કલિઙ્ગા મગધા દાક્ષિણાત્યાશ્ચ સર્વશઃ ॥ ૧૬॥

તથા પરાન્ત્યાઃ સૌરાષ્ટ્રાઃ શૂદ્રાભીરાસ્તથાઽર્બુદાઃ ।
મારુકા માલવાશ્ચૈવ પારિયાત્રનિવાસિનઃ ॥ ૧૭॥

સૌવીરાઃ સૈન્ધવાપન્નાઃ શાલ્વાઃ શાકલવાસિનઃ ।
મદ્રારામાસ્તથાઽમ્બષ્ઠાઃ પારસીકાદયસ્તથા ॥ ૧૮॥

આસાં પિબન્તિ સલિલં વસન્તિ સરિતાં સદા ।
સમોપેતા મહાભાગા હૃષ્ટપુષ્ટજનાકુલાઃ ॥ ૧૯॥

ચત્વારિ ભારતે વર્ષે યુગાન્યત્ર મહામુને ।
કૃતં ત્રેતા દ્વાપરં ચ કલિશ્ચાન્યત્ર ન ક્વચિત્ ॥ ૨૦॥

તપસ્તપ્યન્તિ યતયો જુહ્વતે ચાત્ર યજ્વિનઃ ।
દાનાનિ ચાત્ર દીયન્તે પરલોકાર્થમાદરાત્ ॥। ૨૧॥

પુરુષૈર્યજ્ઞપુરુષો જમ્બૂદ્વીપે સદેજ્યતે ।
યજ્ઞૈર્યજ્ઞમયો વિષ્ણુરન્યદ્વીપેષુ ચાન્યથા ॥ ૨૨॥

અત્રાપિ ભારતં શ્રેષ્ઠં જમ્બૂદ્વીપે મહામુને ।
યતો હિ કર્મભૂરેષા અતોઽન્યા ભોગભૂમયઃ ॥ ૨૩॥

અત્ર જન્મસહસ્રાણાં સહસ્રૈરપિ સત્તમ ।
કદાચિલ્લભતે જન્તુર્માનુષ્યં પુણ્યસઞ્ચયાત્ ॥ ૨૪॥

ગાયન્તિ દેવાઃ કિલ ગીતકાનિ ધન્યાસ્તુ યે ભારતભૂમિભાગે ।
સ્વર્ગાપવર્ગાસ્પદહેતુભૂતે ભવન્તિ ભૂયઃ પુરુષા મનુષ્યાઃ ॥ ૨૫॥

કર્માણ્ય સઙ્કુલ્પિતતત્ફલાનિ સંન્યસ્ય વિષ્ણૌ પરમાત્મરૂપે ।
અવાપ્ય તાં કર્મમહીમનન્તે તસ્મિંલ્લઁયં યે ત્વમલાઃ પ્રયાન્તિ ॥ ૨૬॥

જાની નૈતત્કુવયં (?) વિલીને સ્વર્ગપ્રદે કર્મણિ દેહબન્ધમ્ ।
પ્રાપ્સ્યન્તિ ધન્યાઃ ખલુ તે મનુષ્યા યે ભારતેનેન્દ્રિયવિહીનાઃ ॥ ૨૭॥

નવવર્ષે ચ ભો વિપ્રા જમ્બૂદ્વીપમિદં મયા ।
લક્ષયોજનવિસ્તારં સઙ્ક્ષેપાત્કથિતં દ્વિજાઃ ॥ ૨૮॥

જમ્બૂદ્વીપ સમાવૃત્ય લક્ષયોજનવિસ્તરઃ ।
ભો દ્વિજા વલયાકારઃ સ્થિતઃ ક્ષારોદધિર્બહિઃ ॥ ૨૯॥

॥ ઇતિ બ્રહ્મપુરાણે જમ્બૂદ્વીપવર્ણનમ્ ॥

॥ બ્રહ્મપુરાણમ્ । ભુવનકોશે જમ્બૂદ્વીપવર્ણનમ્ ॥

(ભારતવર્ષપ્રમાણં , તદન્તર્ગતભેદવર્ણનં ,
નદ્યુપનદ્યુત્પત્તિનિરૂપણં , જમ્બૂદ્વીપપ્રાશસ્ત્યવર્ણનઞ્ચ)

.. brahmapurANam . bhuvanakoshe jambUdvIpavarNanam ..

(bhAratavarShapramANaM , tadantargatabhedavarNanaM ,
nadyupanadyutpattinirUpaNaM , jambUdvIpaprAshastyavarNanancha)

Notes:

Brahma Purāṇa બ્રહ્મ પુરાણ; in this chapter has the description about the continent Jambūdvīpa જમ્બૂદ્વીપ that has Bhāratavarṣa ભારતવર્ષ as one of it′s subcontinent that is constituted of Nine Parts viz. Indradvīpa ઇન્દ્રદ્વીપ, Kaśerumān કશેરુમાન્, Tāmraparṇa તામ્રપર્ણ, Gabhasti ગભસ્તિ, Saumya સૌમ્ય, Gāndharva ગાન્ધર્વ, Varuṇa વરુણ, Nāga નાગ, and Bhārata ભારત. Seven Principal Mountain Ranges, i.e. Kulaparvata કુલપર્વત include: Mahendra મહેન્દ્ર, Malaya મલય, Sahya સહ્ય, Śuktimata શુક્તિમત, Ṛkṣa ઋક્ષ, Vindhya વિન્ધ્ય, Pāriyātra પારિયાત્ર.

The chapter numbering in the referenced publications varies.

Encoded and proofread by Ruma Dewan

*Jambudvipavarnanam in Brahmapurana*

pdf was typeset on November 21, 2023

Please send corrections to *sanskrit@cheerful.com*